**International Journal of Research in Economics and Social Sciences(IJRESS)**
Available online at: http://euroasiapub.org
Vol. 13 Issue 09, September- 2023
ISSN: 2249-7382 | Impact Factor: 8.018|
(An open access scholarly, peer-reviewed, interdisciplinary, monthly, and fully refereed journal.)

# वाल्मीकिरामायणे प्रकृतिचिन्तने गङ्गा सामाजिकचेतना च

कु. गरिमा देवी
अतिथि प्रवक्ता संस्कृत विभाग
जगद्गुरु रामभद्राचार्य दिव्याङ्ग राज्य विश्वविद्यालय, चित्रकूट (उ.प्र.)

श्रीमद्वाल्मीकिरामायणं पुराणेभ्यः प्राचीनमिति सर्वजनविदितमेवा रामायणे प्रकृत्याः वृहच्चिन्तनं प्राप्यते। मानवजीवने प्रकृत्याः महद् योगदानं भवति। मनुष्यः प्राकृतिकजीवः वर्तते। प्रकृतिचिन्तनविषये भूतले गङ्गाया: विशिष्ट स्थानं अस्तीति जानीमो वयम्। सर्वेषु पुराणेषु रामायणकथाऽपि दृश्यते । श्रीमद्रामायणमपि प्राचीनकथासम्बन्धीति पुराणमेव भवति । अतः श्रीमद्रामायणे वर्तमानगङ्गायाः कथा सर्वप्रथम उदाहार्या एव। बालकाण्डे पञ्चत्रिंशत् सर्गादारभ्य चतुश्चत्वारिंशत् सर्गपर्यन्त दशसु सर्गेषु एषा कथा प्रतिपादिता । तत्र सप्तत्रिंशे सगँ कुमारोत्पत्तौ गङ्गाया प्राधान्यं प्रदर्शितम् वर्तते ।

विश्वामित्रो यागरक्षार्थं रामलक्ष्मणौ निनाय। यज्ञरक्षानन्तरं तौ मिथिलां नीतवान्। मार्गमध्ये तौ इमां कथां जगाद । पञ्चत्रिंशे सर्गे उमागङ्गावृत्तान्तः सङ्घिप्ततया वर्णितः । ततोऽर्धदिवसे दूरमध्वानं गत्वा ते गङ्गातीरं प्रापुः। ततः कार्याणि कृत्वा रामो विश्वामित्रं गङ्गावृत्तान्तं पृष्टवान् एवं रामेण चोदितो विश्वामित्रो गङ्गाया: जन्म वृद्धि च वक्तुमुपचक्रमे। उत्तरेण भारतवर्षे हिमवान् नाम पर्वतो वर्तते। मेरोर्दुहितरं मेनां हिमवान् उपयेमे। मेनाहिमवतोज्येष्ठा सुता गङ्गा नाम्ना प्रसिद्धा! द्वितीय उमा देवी गङ्गां देवाः सुरकाचिकीर्षया हितवन्तं प्रार्थयित्वा दिवं निन्युः ।

**अथ ज्येष्ठां सुराः सर्वे देवकार्यचिकीर्षया।**

**शैलेन्द्रं वरयामासुर्गा त्रिपथगा नदीम् ॥**

**ददौ धर्मेण हिमवांस्तनयां लोकपावनीम्।**

**स्वच्छन्दपथगा गङ्गा त्रैलोक्यहितकाम्यया ।।**

देवाश्च गङ्गामादाय कृतार्थाः दिवं जग्मुः। षट्त्रिंशे सर्गे उमामाहात्म्यं वर्णितम् परञ्च तस्यैव सर्गस्यान्ते गङ्गाया प्रभाव वक्ष्यमीति विश्वामित्रोक्तः श्लोकः वर्तते। सप्तत्रिंशे सर्गे कुमारोत्पत्तिर्निरूपिता । एकदा सर्वे देवा: ब्रह्माणं शरणं गत्वा "योग्य सेनापतिम् अस्मभ्यं देहि" इति प्रार्थयामासुः। ततः प्राक् ब्रह्मा सेनापतिं शिवस्य पुत्रं नो दास्यामि इति वाचं ददौ। शिवोऽपि हिमालये तपश्चरति स्म । अतो देवाः पुनः ब्रह्माणमुपगम्य एवम् ऊचुः । परमेश्वरो हिमवति तपश्चरति। इदानीं कर्तव्यमाज्ञापय इति ब्रह्मा तान् अब्रवीत्। ततः प्राग् ईश्वरेण पार्वत्याम् उत्सृष्टं वीर्यं श्वेतपर्वतरूपेण तिष्ठति । ज्येष्ठा हिमवतः पुत्री गङ्गा

International Journal of Research in Economics and Social Sciences(IJRESS)
Available online at: http://euroasiapub.org
Vol. 13 Issue 09, September- 2023
ISSN: 2249-7382 | Impact Factor: 8.018|
(An open access scholarly, peer-reviewed, interdisciplinary, monthly, and fully refereed journal.)

तद्वीर्यं वोढुं प्रभवति । "तद्वीर्यं गङ्गां प्रापयत" इति ब्रह्मणा आदिष्टा: देवा: सदर्थं अग्निं नियोजयामासुः। अग्निरपि गङ्गा अभ्येच्य देवकार्यं निवेदितवान् । गङ्गापि दिव्यं रूपं धृत्वा गर्भिणी जाता। पुनः समग्रेण सोढुम् अशक्ता बहुधा क्षुप्तवती । पुनश्च अग्निम् एवं जगाद्। नाहं समग्र यत्तद्वीर्यं वोढुं शक्तास्मि । अतो मया विक्षिप्त अग्निरपि गङ्गायाः वचः श्रुत्वा पुनरेवमुक्तवती । हिमवतः पादे इमं गर्भ निधेहि इति। गङ्गापि तथा कृतवती । सुवर्णरूपं तद्वीर्यं हिमवति सर्वत्र व्याप्तम्। तत्तेजसा शुद्धं तद्भागः पञ्चधा बभूव । तेषु हिरण्यं धरणीं प्राप्तम्। एवं तस्य तीक्ष्णभावेन ताम्र, कृष्णाय च जातम्। पुनश्च परिशिष्टं मलं त्रपुः, सीसकञ्च अभवत् । एवं लोहादयो धातवः तस्मादेव वीर्याज्जाताः। एवं गङ्गायाः कुमार उत्पन्नः। तं च कृत्तिकाः षट् संवर्धयामासुः। अतः कुमारो गाङ्गेयः इति नाम्नाऽपि विख्यातः ।

ततो गङ्गायाः प्रभावञ्च विश्वामित्र एवमुक्तवान् । अष्टात्रिंशे सर्गे सगरस्य कथा विद्यते । इक्ष्वाकुवंशे सगरो नाम राजा आसीत् । तस्य द्वे भार्ये केशिनी सुमतिश्चेति । स च अनपत्यो हिमवति वर्षशतं तपश्चचार । तस्य तपसा प्रसन्नो मुनिः सगराय वरं ददौ। एका वंशस्य कर्त्तारं पुत्रं जनयिष्यति, द्वितीया षष्टिसहस्राणिपुत्रान् जनयिष्यतीति। केशिनी वंशकरं पुत्रं वव्रे। द्वितीया षष्ठि सहस्रपुत्राणां माता बभूव केशिनीसुतस्य नाम असमञ्जः सः हिंसापरायणः क्रूरश्च बभूव । असमञ्जसस्य पुत्रः अशुमान् सर्वोत्तमः। एकदा सगरः अश्वमेधयष्टुमुत्सुको जातः । एकोनचत्वारिंशत्सर्गे सगरपुत्राणां वृत्तान्तं वर्णितम्। सगरपुत्राः यागाश्वरक्षकाः यागाश्वमनुसृत्य गताः । इन्द्रो राक्षसरूपेण यागाश्वं जहार सागरा इन्द्रम् अनुधावितवन्तः सोऽपि मायया पातालं प्रविष्टः । ततः तमन्वेष्टुं (सागराः) सागरपुत्राः भूमिं विदारयामासुः। एकैकेन एक योजनमिति योजनानां षष्टिसहस्राणि निखातानि ततः तन्मितो गर्ता बभूव । देवा अपि खननवृत्तान्तं ब्रह्माणं निवेदयामासुः। ततो ब्रह्मा तानेवं जगाद । कपिलरूपिणा नारायणेन भूः रक्षिता भविष्यतीति ततः पुनः पित्राज्ञया तिस्रः दिशो गत्वा प्रत्येकं दिशि पष्ठिसहस्रयोजनमितान् गर्तान् निचख्नतुः । सागराश्च भूमि भित्वा पातालं गत्वा यागाश्वम् अदृष्ट्वा कपिलाश्रमं जग्मुः। अयमेव अश्वस्य हर्ता इति कपिल पराभूय कपिलेन भस्मसात् कृताः । असमञ्जसस्य पुत्र अशुमान पातालं गत्वा कपिलं प्रसाद्य यागाश्व लेगे। किन्तु पितव्याणां सलिलक्रियाः कर्तुम् अलब्धः सलिलः चिन्तापरो बभूव ततः पितणां मातुलो चैनतेय अशुमतं दृष्टवान् । ततो वैनतेयाऽशुमन्तम् एवं जगाद । एते ते पितरः कपिलकोपाग्निना दग्धाः। अतो लौकिकेन सलिलेन एषा निवाप दानं न तेषां पुण्यलोकगतिकारणं भवति । यदि शक्नोषि गङ्गामानीय एतान् सर्पय इति

गङ्गायाः प्रभावनिरूपक श्रीमद्वारामायणस्थाः श्लोकाः यथा तथैव उदाह्रियन्तेऽत्र–

**विसायं निपुणां दृष्टि ततोऽपश्यत् खगाधिपम् ।**

**पितृणां मातुलं राम सुपर्णमनिलोपमम्।।**

International Journal of Research in Economics and Social Sciences(IJRESS)
Available online at: http://euroasiapub.org
Vol. 13 Issue 09, September- 2023
ISSN: 2249-7382 | Impact Factor: 8.018|
(An open access scholarly, peer-reviewed, interdisciplinary, monthly, and fully refereed journal.)

**सचैनमब्रवीद्वाक्यं वैनतेयो महाबलाः।**

**मा शुचः पुरुषव्याघ्र वधोऽयं लोकसम्मतः ।।**

**कपिलेनाप्रमेयेण दग्धा हीमे महाबलाः।**

**सलिलं नाहीस प्राज्ञ दातुमेषां हि लौकिकम् ।।**

**गङ्गा हिमवतो ज्येष्ठा दुहिता पुरुषर्षभ।**

**तया क्लिन्नमिदं भस्म गङ्गाया लोककान्तया ।।**

**षष्ठि पुत्रसहस्राणि स्वर्गलोकं गमिष्यति ।**

**निर्गच्छश्वं महाभाग संगृह्य पुरुषर्षभ।।**

एषा कथा एकचत्वारिंशत् सर्गपर्यन्तं प्राप्यते । द्विचत्वारिंशे सर्गे भगीरथप्रयत्नः वर्णितः । सगरः तपसे उद्यमं न चकार। त्रिंशद्वर्षसहस्राणि राज्यं कृत्वा दिवं गतः ।

अंशुमानपि स्वपुत्रे दिलीपे राज्यभारं निक्षिप्य तपश्चचार । द्वात्रिंशत् सहस्राणि वर्षाणि तपः तप्त्वा दिवं ययुः। दिलीपः पितुस्सङ्कल्पं पूरयितुं चिन्तापरोऽपि तपसे न गतवान्। दिलीपस्य पुत्रो भगीरथोनपत्यः प्रजाकामो मन्त्रिषु राज्यभार निक्षिप्य त्रिंशद्वर्षसहस्राणि तपः चचार । ततः (पितामहः) ब्रह्मा प्रत्यक्षीभूय वरं दास्यामीति अवदत् सोऽप्येवं वरं चत्रे सगरस्यात्मजास्सर्वे मया दत्तं सलिलम् आप्नुयुः । एतेषां भस्म गङ्गायाः सलिलेन आप्लुतं भवतु । एते च स्वर्गं गच्छेयुः। इक्ष्वाकुवंश– हानिर्नभवेदिति मह्यमपि सन्ततिदेया । ततो ब्रह्मा एवं जगाद

**इयं हैमवती ज्येष्ठा गङ्गा हिमवतः सुता ।**

**तां व धारयितुं राजन् हरस्तत्र नियुज्यताम् ॥**

**गङ्गायाः पतनं राजन् पृथिवीन सहिष्यते।**

**तां वै धारयितुं राजन् नान्यं पश्यामि शूलिनः ।।**

**तमेवमुक्त्वा राजानं गङ्गा चाभाष्य लोककृत्।**

**जगाम त्रिदिवं देवैः सह सर्वैमरुद्गणैः।।**

त्रिचत्वारिंशत् सर्गे गङ्गावतरणं वर्णितम्। ब्रह्मणः आदेशमनुसरन् भगीरथः शिवमुद्दिश्य संवत्सर निराहारमवलम्ब्य तपश्चचार । ततः शिवः प्रत्यक्षीभूय गङ्गा धारयिष्यामीति वरं ददौ। गङ्गापि धारावेगेन शङ्करमपि पातालं नीत्वा सुखिनी भवामि इति कृतावलेपा महता वेगेन शिवशिरसि पतिता । तस्याः गर्वेण कुपितः शिवो तां जटाजूटे बबन्ध गङ्गापि अलब्ध निर्गमा अनेकवर्षाणि हरजटाजूटे एवं वसतिं चक्रे । गङ्गामदृष्ट्वा भगोरथः पुनः तपश्चचार । ततः प्रसन्नेन शङ्करेण गङ्गाजटाजूटाद् विसृष्टा विसर्जनकाले सा बिन्दुसरसि पपात तदानीं तस्याः सप्तस्रोतांसि अभवन् ।

१. हादिनी  २. पावनी ३. नलिनी इत्येताः तिस्रः नद्यः प्रतीचीं दिशं जग्मुः ।

४. सुचक्षुः  ५. सीता ६. सिन्धु  इत्येताः तिस्रः नद्यः प्राची दिशं जग्मुः ।

७. अलकनन्दापरं नाम गङ्गा भगीरथमनुजगाम साप्यलकनन्दा महता संरम्भेण भगीरथमनुजगाम ।

अत्रान्तरे गङ्गा जनो आश्रमं यज्ञवाटञ्च संप्लावयामास ततः कुपितो मुनिः सर्वा नदीं पीतवान् ।

पुनर्भगीरथेन प्रार्थितो विसृष्टवान् च जनो श्रोत्रात् सा निर्गता । अतो जनुसुता गङ्गा जाहनवीति कीर्तिता।

चतुश्चत्वारिंशे सर्गे सगरपुत्राणामुत्तमा गत्तिर्गङ्गायाः नाम्ना निरुक्तिश्च वर्णिता ।

इयं च दुहिता ज्येष्ठा तव गङ्गा भविष्यति । त्वत्कृतेन नाम्नाथ लोकं स्थास्य विश्रुता ।। गङ्गा त्रिपथगा नाम दिव्या भागीरथीति च। त्रीन् पथो भावयन्तीति तस्मात् त्रिपथगा स्मृता ।। श्रीमद्रामायण अयोध्याकाण्डे चतुःपञ्चाशे सर्गे गङ्गायमुनाप्रवाहममहत्त्वं वर्तते। अयोध्यायाः रामो दक्षिणां दिशं प्रतस्थे। अयोध्यायाः प्रस्थितः प्रथमे दिने रामः गङ्गामेव दृष्टवान्।

**तत्र त्रिपथगा दिव्यां शीततोयामशैवलाम्।**

**ददर्श राघवो गङ्गां पुण्यामृषिनिषेविताम्।।**

ततो गङ्गां तीर्त्वा गुण सत्कृतः तां रात्रि तत्र निनाय द्विपञ्चाशे स पुनर्गङ्गा तत्वां कञ्चिद्दर गत्वा भारद्वाजाश्रमं गन्तुं प्रवृत्तो गङ्गायमुनयोः सङ्गमक्षेत्र प्रयागम् आगतवान् । तस्मिन्नेव तीरे भारद्वाजाश्रम वर्तते । अद्यापि भारद्वाजाश्रम नाम्ना स्थानमेक प्रयाग प्रसिद्धम् । तत्र नवभिः श्लोकः गङ्गायमुनयोः सङ्गम प्रयागक्षेत्रमुपवर्णितम्।

**ते तु तस्मिन् महावृक्षे उषित्वा रजनी शुभम्। विमलेऽभ्युदिते सूर्येतस्माद्देशात् प्रतस्थिरे ||**

**यत्र भागीरथीं गङ्गां यमुनाभिप्रवर्ततो । जग्मुस्तं देशमुद्दिश्य विगाह्य सुमहद्वनम् ॥**

**ते भूमिभागान् विविधान् देशाश्चापि मनोहरान् । अदृष्टपूर्वान् पश्यन्तस्तत्र तत्र यशस्विनः ।।**

**यथा क्षेमेण सम्पश्यन् पुष्पितान् विविधान् द्रुमान्। निर्वृत्तमात्रे दिवसे रामः सौमित्रिमब्रवीत्।।**

**प्रयागमभितः पश्य सौमित्रे धूममुत्तमम्। अग्नेर्भगवतः केतु मन्ये सनिहितो मुनिः ।।**

**नूनं प्राप्ताः स्म सम्भेदं गङ्गायमुनयोर्वयम्। तथाहि श्रूयते शब्दों वारिणोवरिघर्षजः।।**

**दारूणि परिभिन्नानि वनजैरुपजीविभिः । छिन्नाश्चाप्याश्रमे चैते दृश्यन्ते विविधा द्रुमाः।।**

**धन्विनौ तौ सुखं गत्वा लम्बमाने दिवाकरे। गङ्गायमुनयोः सन्धौ प्रापतुनिलयं मुनोः ।।**

**रामस्त्वाश्रममासाद्य त्रासयन् मृगपक्षिणः । गत्वा मुहूर्तमध्वानं भरद्वाजमुपागमत् ।।**

रामायणे गङ्गायाः वृहद् वर्णनं वर्तते। प्राचीनकालादेव गङ्गा नदीरूपेण न अपितु अस्माकं मातृरूपेण प्रतिष्ठित वर्तते वर्तमानकाले महत्कष्टमिदं तथ्यं यत् सार्वजनिक जलस्थानेषु अमेध्यपदार्थानां विसर्जनेन सङ्कोचमनुभवन्ति जनाः। गङ्गासदृशा पवित्रनदी अपि प्रदूषिता वर्तते। येन तस्याः जलं केषुचित्स्थानेषु अस्वाथ्यकर जातम् । गङ्गाया महत्त्व रामायण वाल्मीकिमुनिना राम श्रावितम् उपरोक्त रामायणवचनानि चेदवहिताः पालयेषु जनाः तर्हि जलसंरक्षण प्राकृतिकस्तरे एवं भवितुमर्हति। अतः नदीनदसरित्पत्तिसमुद्रतीरे तज्जले वा शरीरस्य मलत्यागः कदापि न करणीयम् गङ्गा अस्माकं जननी इव वन्द्या चेत्कथं तस्या इदृशी स्थितिः । या शिशुवत्समग्रं भारतं क्षीरपानेन परिपालयति तया समम् ईदृशोऽपि किम् अस्मदीय व्यवहारी न्याय्यः। नाह तथा सति नदींना संरक्षण, तासा पवित्रतास्थापनायै च इत आरभ्य एव अस्माभिः कृतसङ्कल्पैर्भाव्यम्। तदैव मानवीय जीवन सम्भव स्वस्थं सुरक्षित च स्यात् । सुविस्तृत क्षेत्रे प्रवाहमानाना नदीनां संरक्षणस्य समस्याऽतीवकदिना । यावत् पर्यन्तं परलोकभयं न स्यात् नदीं प्रति आदर्श न स्यात् तावत्पर्यन्तं कथमपि पर्यावरणस्य संरक्षण कर्तुं न शक्नुमः वर्तमानसमये नदीनां यादृशी दुर्दशा सा तु समेषां विदितमेव कीदृशमपेयं जातं जल प्रदूषणेन? अत्र किं करणीयम्? इति सर्वमस्माभिर्विचारणीयम् । वर्तमानकालेऽपि गङ्गातटे दानस्य गङ्गायां स्नानस्य महत्त्वं वर्तते। साम्प्रतिके गङ्गाजलेन विविधप्रदेशेषु मानवाः कृषिकार्य कुर्वन्ति, पेयजलमपि गङ्गात अनेकेषु स्थानेषु प्राप्यते विद्युतमपि गङ्गाया निर्माण कुर्वन्ति। अतः साम्प्रतिकेऽपि गङ्गाया महत्त्वं विशिष्ट वर्तते। गङ्गा विना देशे विद्युतापूर्तिः कृषिकार्य पेयजलसमस्या भवितुं शक्यते। अतः गङ्गासंरक्षणार्थं पुराणोपपुराणानुसार मानव आचरेत्। तर्हि मानवा इहलोके सुखपूर्वक जीवनयापन कृत्वा परलोके परमं पदं प्राप्तुं शक्यन्ते इति । गङ्गादिपवित्रतोयाना संरक्षणमवश्यमेव कर्तव्यमस्माभिः । यदानद्यः निर्मलाविरलधारया प्रवहिष्यन्ति तदा अस्माकं जीवनधारा अपि प्रवतिष्यति।

**सामाजिकचेतना**

International Journal of Research in Economics and Social Sciences(IJRESS)
Available online at: http://euroasiapub.org
Vol. 13 Issue 09, September- 2023
ISSN: 2249-7382 | Impact Factor: 8.018|
(An open access scholarly, peer-reviewed, interdisciplinary, monthly, and fully refereed journal.)

रामायणे वर्णित शिक्षाया आदर्शमानवानां शारीरिक–बौद्धिक–भाषायिक–सामाजिक–नैतिक–राजनैतिकादि समस्तानां विकासो भवितुमर्हति । कस्यचिदेशस्य संस्कृतंस्तद्वि– भिन्नयुगानामान्तर–विचारपरम्परोद्भूतकं भूषणयुक्तस्थितेद्योतका वर्तते। विश्वेऽस्मिन् प्राचीनर्वाचीनानेका संस्कृतयो विद्यन्ते किन्तु तासु सर्वासु संस्कृतिसु भारतीयसंस्कृतरनपमं सर्वोच्चञ्च स्थानं विद्यते। एषा संस्कृति पौरपाश्चात्याः सर्वेऽपि स्वीकुर्वन्ति । भारतीयसंस्कृततेनिवाहकरूप रामायणमक देदीप्यमान रत्नमित्र। यस्यादर्शप्रभा सम्पूर्णऽपि भारते दरीदृश्यते तदनुपालनमखिलोऽपि भारतीयसनातन परम्परावलम्बनो करोति तेनैवास्माक सन्मार्गदर्शन च भवति वाल्मीकिरामायण जीवनस्य प्रत्येकस्मिन् सम्बन्धं एतदादर्शतत्त्वस्य व्यवहारिको स्थापना दृश्यते। श्रद्धाभक्तिसुदृढमातृपुत्रयोस्सम्बन्धस्नेहश्लेषसंकुलवंशपरम्परादर्शसम्बन्धादयः तत्रः केशलेन्द्रतनयायाः विमात्र्यदर्शो ध्वस्तो दृश्यते परन्तु परिणामवस्थायान्महदपयोगीत रामचन्द्रेण स्वविनयोज्ज्वलशौर्य पराक्रममर्यादिभिर्यद्विहितन्तत्सर्वमिहलोकहितकरमनुकारकाञ्च तेनैव तस्मादर्शत्वं स्वतस्सिद्धम्।कैकेयै कुछ सन् दशरथो सकैकयी भरतमत्यजेत् तस्माच्च तस्य स्वर्गवासोऽभूत इति सर्वलोकविदितमेव। लङ्काविजयानन्तरं नागलोकादागतं दशरथं याचते यत्तत्प्रदतशाप कैकेयों मा स्पृशायेत् –

**सुपुत्रां त्वां त्यजायीति यदुक्ता कैकेयी त्वया ।**

**स शापः केकयीं घोरः सुपुत्रां न स्पृशेत् प्रभो ॥**

साम्प्रतिक भौतिकवादियुगे भरतसदृशः भ्रातऽन्वेषणं कुर्मा तथापि न दृश्यते यतोहि दुःखपरिपूर्ण राममनुकृत्य चतुर्दशवर्षं यावद्वनवासीव स्वजीवन यापितवान् तथापि लोकैः सर्वथाऽनुकरणीयमेव ।

**ददर्श भरतं दीनं कृशमाश्रमवासिनम्**

**जटिलं मलविग्धाङ्ग भ्रातृव्यसनकर्शितम् ।**

**निपतं भवितात्मानं ब्रह्मर्षिसमतेजसम्**

**पावु ते पुरस्कृत्य प्रशासन्तं वसुंधराम् ॥**

भारतीय निर्मलातुङ्गततया निर्मल ऋषिज्ञानपरम्परया समाजस्य विभिन्नोपयोगिनी कार्यप्रणालीमवलोक्य चातुर्वण्यस्य स्थापना कृता वेदेषु तत्सर्व वाल्मीकिरामायणे प्राप्सते। समाजिकैक्यदृष्ट्याऽयं विभाजनक्रमः सर्वप्राणिहितकर आसीत् तदानीम् । प्राणिषु सद्भाव आसीत् स्व–स्वः कुलवंशपरम्परोचितकर्मस्वभिरता आसन्मानवाः अत्रादि काव्ये चतुर्णां वर्णानामुल्लेखः तेषां कर्त्तव्यानि च निरूपितानि सन्ति–

**International Journal of Research in Economics and Social Sciences(IJRESS)**
Available online at: http://euroasiapub.org
Vol. 13 Issue 09, September- 2023
ISSN: 2249-7382 | Impact Factor: 8.018|
(An open access scholarly, peer-reviewed, interdisciplinary, monthly, and fully refereed journal.)

**दशरथराज्यकाले वेदानुप्रमाणितेनराजकार्येण सुशासनेन च**

**सर्वेषां प्राणिनां पालन पोषणं दण्डिविधानञ्च भवतिस्म ।**

यथा– **वर्णेष्वग्ग्रचतुर्थेषु देवतातिथिपूजकाः ।**

**कृतज्ञाश्च वदान्याश्च शूरा विक्रमसंयुताः ।।**

दशरथस्य पुत्रेष्तियागे पुरोहित विशिष्ठादेशेन सर्ववर्णानां सत्कारा विहितः दातव्यमत्रं विधिवत्सकृत्य न तु लीलया सर्वे वर्णा यथ पूजां प्राप्नुवन्ति सुसतकृता । रामराज्येऽपि चातुर्वर्ण्य लोभरहितः सन् स्वकार्य करोति स्म।

**ब्राह्मणः क्षत्रियः वैश्याः शूद्रा लोभविवर्जिता।**

**स्वकर्मसु प्रवर्तन्ते तुष्टाः स्वैरेव कर्मिभिः ॥**

अयोध्यामधिवसन्ताः क्रमशः ब्राह्मण क्षत्रिय वैश्य शूद्रजातीय जनाः स्वं स्वकर्मानुसारं कार्यकृत्वा सुखमनुभवन्ति स्म। यथा रामायणे–

**क्षत्रं ब्रह्ममुखं चासीत् वैश्याः क्षत्रमनुव्रताः ।**

**शूद्राः स्वकर्मनिरतास्वीन् वर्णानुपचारिणः ।।**

अर्थात् क्षत्रियब्रह्मवन्त्रनानुसारं क्षत्रीयधर्मस्य पालन, वैश्या तद्राजधमांनुसार धनार्जनं शुद्राश्च सेवाकार्यं कुर्वन्ति स्म। महर्षिवाल्मीकिना ब्रह्मज्ञानोन्मुखाः तपोलीनाः सत्यस्वाध्यायवचननिरताः ब्राह्मणाः सर्वश्रेष्ठा इति प्रतिपादिता । तदिभय– संयमाध्ययन–परायण दानशीलता विनम्रता ईष्याभावरहित बुद्धिमत यज्ञदक्षतादयो गुणा ब्राह्मणेषु आसन्निति प्रागल्भगिरा प्रोवाच ।

यथा– **स्वकर्मनिरता नित्यं ब्राह्मणा विजितेन्द्रियाः ।**

**दाना ययनशीलश्च संयताश्च प्रतिग्रहे ।**

श्रेष्ठतागुणविशेषादेव ब्राह्मणोऽमात्यादिषु पदेषु नियुक्तो भवतिस्मा भूपतिर्भूसुरस्य यथायोग्य सम्मानं करोति स्म। दशरथस्य राजभवने समागतस्य पुरोहितवशिष्ठस्य सर्व समुत्थाय समादरेण सभाजयन्ति **तमागतभिप्रेक्ष्य हित्व राजासनं नृपः। पप्रच्छं स्वमतं तस्मै कृतमित्यभिवेदयत् ॥**

तेन चैव तदा तुल्य सहासीनाः सभासदः । आसनेभ्यः समुत्तस्थुः पूजयन्तः पुरोहितम्।।

महाराज दशरथस्य मृत्युकाले चतुर्षु पुत्रेष्वेकोऽपि नासोद्रयोध्यायाम्। तत्समये सर्वे। मन्त्रिभिर्ब्रह्मनिष्ठाचार्य वशिष्ठोऽधिकृतो यदस्यानुसारेणैव श्रेष्ठजनो राजपदमलङ्कृतरिष्यतीति ।

यथा रामायणे– **स नः समीक्ष्य द्विजवर्य वृत्तं नृपं विना राष्टश्रण्यभूतम् ।**

**कुमारमिक्ष्वाकुसुतं तथान्यं त्वमेव राजानमिहाभिषेचय ।।**

वस्तुतः स्वगुणैः पूज्यः आसीत् ब्राह्मणः ।

भारतीयवैदिकवर्णव्यवस्थां ब्राह्मणवर्णानन्तरं क्षत्रियवर्णस्य क्रमः समागच्छति। क्षत्रियो स्वपराक्रमादिगुणैस्माकं दान यज्ञ देहत्यादिगुणैः नृपपदप्राप्नुवन्ति स्म।

**इवं हि वृत्तमुचितं कुलस्यास्य सनातनम्।**

**दान दीक्षा च यज्ञेषु तनुत्यागो मृधेषु हि ।।**

रमोवनप्रस्थानकाले बहुमूल्याभरणानि ब्राह्मणेभ्यः अददात् ।

**ब्राह्मणेभ्यश्च रत्नानि भिक्षुकेभ्यश्च भोजनम्।**

**देहि चाशंसमानेभ्यः संत्वरस्व च मा चिरम् ।।**

तत्कालीन वैदिक परम्परानुसारेण संस्कृत्यनुसारेण च क्षत्रिय बाल एवं राजपदमधितिष्ठति स्म । चित्रकूट पर्वते वनागतः रामौ यथा प्रार्थितो भरतेन–

**एष हि प्रथमो धर्मः क्षत्रियस्याभिषेचनम्**

**येन शक्यं महाप्राज्ञ प्रजानां परिपालनम्।**

सन्दर्भग्रन्थसूची–

1. रामायण महर्षिवाल्मीकि इनेडोलॉजिकल चुक हाउस दिल्ली, 1983 2. श्रीमद्वाल्मीकि रामायणम् एन् रामरत्नम् मेलापुर मद्रास 1958
2. 3. श्रीमवाल्मीकि रामायणम् महर्षिवाल्मीकिः गीताप्रेस गोरखपुर 2000 4. रामायणम् वासुदेव लक्ष्मण शर्मा पाण्डुरंगा जावाजी 1930.
3. श्रीमद्वाल्मीकि रामायणम्, बालकाण्डे – ३५/१७–१८

**International Journal of Research in Economics and Social Sciences(IJRESS)**
Available online at: http://euroasiapub.org
Vol. 13 Issue 09, September- 2023
ISSN: 2249-7382 | Impact Factor: 8.018|
(An open access scholarly, peer-reviewed, interdisciplinary, monthly, and fully refereed journal.)

4. श्रीमद्वाल्मीकि रामायणम्, बालकाण्डे ४२/१६ – २१
5. श्रीमद्वाल्मीकि रामायणम्, बालकाण्डे ४१ / २६
6. श्रीमद्वाल्मीकि रामायणम्, बालकाण्डे ४२/४
7. श्रीमद्वाल्मीकि रामायणम्, बालकाण्डे ४२ / २३–२५
8. श्रीमद्वाल्मीकि रामायणम्, बालकाण्डे ४३/३८
9. श्रीमद्वाल्मीकिरामायणम् बालकाण्डे ४४/५–६
10. श्रीमद्वाल्मीकिरामायणम् अयोध्याकाण्डे ५० / १२
11. श्रीमद्वाल्मीकि रामायणम्, अयोध्याकाण्डे ५४/१–९
12. श्रीमद्वाल्मीकि रामायणम् युद्धकाण्डे 119.25
13. श्रीमद्वाल्मीकि रामायणम् युद्धकाण्डे 125.30–32
14. श्रीमद्वाल्मीकि रामायणम् बालकाण्डे 6.17
15. श्रीमद्वाल्मीकि रामायणम् बालकाण्डे – 13.14 –
16. श्रीमद्वाल्मीकि रामायणम् युद्धकाण्डे 128.104
17. श्रीमद्वाल्मीकि रामायणम् बालकाण्डे 6.19
18. श्रीमद्वाल्मीकि रामायणम् बालकाण्डे 6.13 8.
19. श्रीमद्वाल्मीकि रामायणम् अयोध्याकाण्डे– 67.38 9.
20. श्रीमद्वाल्मीकि रामायणम् अयोध्याकाण्डे 30.43–45
21. श्रीमद्वाल्मीकि रामायणम् अयोध्याकाण्डे 106.19